# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय १७

अथ राजन्महाबाहुर्विचरन्स महीतलम् ।
हिमवद्वनमासाद्य परिचक्राम रावणः ॥ १ ॥

तत्रापश्यत वै कन्यां कृष्टाजिनजटाधराम् ।
आर्षेण विधिना युक्तां तपन्तीं देवताम् इव ॥ २ ॥

स दृष्ट्वा रूपसम्पन्नां कन्यां तां सुमहाव्रताम् ।
काममोहपरीतात्मा पप्रच्छ प्रहसन्निव ॥ ३ ॥

किमिदं वर्तसे भद्रे विरुद्धं यौवनस्य ते ।
न हि युक्ता तवैतस्य रूपस्येयं प्रतिक्रिया ॥ ४ ॥

कस्यासि दुहिता भद्रे को वा भर्ता तवानघे ।
पृच्छतः शंस मे शीघ्रं को वा हेतुस्तपोऽर्जने ॥ ५ ॥

एवमुक्ता तु सा कन्या तेनानार्येण रक्षसा ।
अब्रवीद्विधिवत्कृत्वा तस्यातिथ्यं तपोधना ॥ ६ ॥

कुशध्वजो नाम पिता ब्रह्मर्षिर्मम धार्मिकः ।
बृहस्पतिसुतः श्रीमान्बुद्ध्या तुल्यो बृहस्पतेः ॥ ७ ॥

तस्याहं कुर्वतो नित्यं वेदाभ्यासं महात्मनः ।
सम्भूता वान्मयी कन्या नाम्ना वेदवती स्मृता ॥ ८ ॥

ततो देवाः सगन्धर्वा यक्षराक्षसपन्नगाः ।
ते चापि गत्वा पितरं वरणं रोचयन्ति मे ॥ ९ ॥

न च मां स पिता तेभ्यो दत्तवान्राक्षसेश्वर ।
कारणं तद्वदिष्यामि निशामय महाभुज ॥ १० ॥

पितुस्तु मम जामाता विष्णुः किल सुरोत्तमः ।
अभिप्रेतस्त्रिलोकेशस्तस्मान्नान्यस्य मे पिताः ॥ ११ ॥

दातुमिच्छति धर्मात्मा तच्छ्रुत्वा बलदर्पितः ।
शम्भुर्नाम ततो राजा दैत्यानां कुपितोऽभवत् ।
तेन रात्रौ प्रसुप्तो मे पिता पापेन हिंसितः ॥ १२ ॥

ततो मे जननी दीना तच्छरीरं पितुर्मम ।
परिष्वज्य महाभागा प्रविष्टा दहनं सह ॥ १३ ॥

ततो मनोरथं सत्यं पितुर्नारायणं प्रति ।
करोमीति ममेच्छा च हृदये साधु विष्ठिता ॥ १४ ॥

अहं प्रेतगतस्यापि करिष्ये काङ्क्षितं पितुः ।
इति प्रतिज्ञामारुह्य चरामि विपुलं तपः ॥ १५ ॥

एतत्ते सर्वमाख्यातं मया राक्षसपुङ्गव ।
आश्रितां विद्धि मां धर्मं नारायणपतीच्छया ॥ १६ ॥

विज्ञातस्त्वं हि मे राजन्गच्छ पौलस्त्यनन्दन ।
जानामि तपसा सर्वं त्रैलोक्ये यद्धि वर्तते ॥ १७ ॥

सोऽब्रवीद्रावणस्तत्र तां कन्यां सुमहाव्रताम् ।
अवरुह्य विमानाग्रात्कन्दर्पशरपीडितः ॥ १८ ॥

अवलिप्तासि सुश्रोणि यस्यास्ते मतिरीदृशी ।
वृद्धानां मृगशावाक्षि भ्राजते धर्मसञ्चयः ॥ १९ ॥

त्वं सर्वगुणसम्पन्ना नार्हसे कर्तुमीदृशम् ।
त्रैलोक्यसुन्दरी भीरु यौवने वार्धकं विधिम् ॥ २० ॥

कश्च तावदसौ यं त्वं विष्णुरित्यभिभाषसे ।
वीर्येण तपसा चैव भोगेन च बलेन च ।
न मयासौ समो भद्रे यं त्वं कामयसेऽङ्गने ॥ २१ ॥

म मैवमिति सा कन्या तमुवाच निशाचरम् ।
मूर्धजेषु च तां रक्षः कराग्रेण परामृशत् ॥ २२ ॥

ततो वेदवती क्रुद्धा केशान्हस्तेन साच्छिनत् ।
उवाचाग्निं समाधाय मरणाय कृतत्वरा ॥ २३ ॥

धर्षितायास्त्वयानार्य नेदानीं मम जीवितम् ।
रक्षस्तस्मात्प्रवेक्ष्यामि पश्यतस्ते हुताशनम् ॥ २४ ॥

यस्मात्तु धर्षिता चाहमपाया चाप्यनाथवत् ।
तस्मात्तव वधार्थं वै समुत्पत्स्याम्यहं पुनः ॥ २५ ॥

न हि शक्यः स्त्रिया पाप हन्तुं तं तु विशेषतः ।
शापे त्वयि मयोत्सृष्टे तपसश् च व्ययो भवेत् ॥ २६ ॥

यदि त्वस्ति मया किं चित्कृतं दत्तं हुतं तथा ।
तेन ह्ययोनिजा साध्वी भवेयं धर्मिणः सुता ॥ २७ ॥

एवमुक्त्वा प्रविष्टा सा ज्वलन्तं वै हुताशनम् ।
पपात च दिवो दिव्या पुष्पवृष्टिः समन्ततः ॥ २८ ॥

पूर्वं क्रोधहतः शत्रुर्ययासौ निहतस्त्वया ।
समुपाश्रित्य शैलाभं तव वीर्यममानुषम् ॥ २९ ॥

एवमेषा महाभागा मर्त्येषूत्पद्यते पुनः ।
क्षेत्रे हलमुखग्रस्ते वेद्यामग्निशिखोपमा ॥ ३० ॥

एषा वेदवती नाम पूर्वमासीत्कृते युगे ।
त्रेतायुगमनुप्राप्य वधार्थं तस्य रक्षसः ।
सीतोत्पन्नेति सीतैषा मानुषैः पुनरुच्यते ॥ ३१ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com